**4 ॰श्चतुर्दश विद्यास्थानान्या॰** ] Cf. *Tantravārttika* ad 1.3.6 (201.23–25): **परिमितान्येव (परिमितान्येव] cor.; परमितान्येव ed.) हि चतुर्दशाष्टादश वा विद्यास्थानानि धर्मप्रमाणत्वेन शिष्टैः परिगृहीतानि वेदोपवेदाङ्गोपाङ्गाष्टादशधर्मसंहितापुराणशास्त्रशिक्षादण्डनीतिसंज्ञकानि, न च तेषां मध्ये बौद्धार्हतादिग्रन्थाः स्मृता गृहीता वा।**

**7 प्रथमो ऽथर्ववेदः** ] For Jayanta's unique view on the *Atharvaveda*, see *Nyāyamañjarī* I 614.6–629.15; also see Kataoka [2006c].

---

**1 योगिनामिव** ] $MVA_1G_1K_1L_1$; **योगिनामेव** $G_2$ **1 ॰नाद्युपा॰** ] $MVA_1G_1G_2L_1$; **॰नाभ्युपा॰** $M^{ka}$; **॰नमुपा॰** $K_1$ **2 ॰स्मदादिभिः** ] $A_1G_2K_1L_1$; **॰स्मदादेः** $MVG_1$ **2 ॰धिगन्तव्यम्** ] $MVA_1G_2L_1$; **॰वगन्तव्यम्** $G_1K_1$ **4 तच्च** ] $MVG_1K_1L_1$; **तच्** $A_1G_2$ **4 चतुर्दशविधम्** ] $MVA_1G_1G_2K_1L_1$; **चतुर्विधं** $M^{ka}$ **4 ॰स्थाना॰** ] $MVG_1G_2K_1L_1$; **॰स्थांना॰** $A_1$ **8 यजुर्वेदः** ] $MVG_1G_2K_1L_1$; **यंजुर्वेदः** $A_1$ **8 त एते** ] $M^{en}A_1^{pc}G_2K_1L_1$; **एते** $MVG_1$; **त एदते** $A_1^{ac}$ **8 वेदास्तावत्सा॰** ] $M^{en}A_1G_2K_1L_1$; **वेदाः सा॰** $MVG_1$

व पुरुषार्थसाधनोपदेशस्वभावाः, “अग्निहोत्रं जुहुयात्स्वर्गकामः” “आत्मा ज्ञातव्यः” इत्यादिश्रुतेः।

[3.1.2 धर्मशास्त्रम्]

स्मृतिशास्त्रमपि मन्वाद्युपनिबद्धमष्टकाशिखाकर्मप्रपाप्रवर्तनादिपुरुषार्थसाधनोपदेश्येव दृश्यते। अश्रूयमाणफलानामपि कर्मणां फलवत्ता विधिवृत्तपरीक्षायां वक्ष्यते। सर्वो हि शास्त्रार्थः पुरुषार्थपर्यवसायी, न स्वरूपनिष्ठ इति।

---

**4 स्मृतिशास्त्रमपि ⋯ दृश्यते** ] Cf. *Nyāyamañjarī* I 630.6–7: **मन्वादिप्रणीतानि धर्मशास्त्राणि वेदवत्तदर्थानुप्रविष्टविशिष्टकर्मोपदेशीनि प्रमाणमेव।**
**4 °मष्टकाशिखाकर्मप्रपाप्रवर्तनादि°** ] Cf. *Śābarabhāṣya* ad 1.3.1 (159.12–160.2): **यथा “अष्टकाः कर्तव्याः”, “गुरुरनुगन्तव्यः”, “तडागं खनितव्यम्”, “प्रपा प्रवर्तयितव्या”, “शिखाकर्म कर्तव्यम्” इत्येवमादयः।**
**6 वक्ष्यते** ] *Nyāyamañjarī* II 128.12–17: **ननु कामनाधिकारे स्वर्गः श्रूयते, नित्याधिकारे त्वसौ न श्रूयते। अश्रूयमाणः कस्यानुरोधेन कल्प्यते। विधेरेवेति ब्रूमः। स्वर्गेण श्रुतेनापि किं करिष्यति, यद्यसौ विधिना नापेक्ष्येत। “घृतकुल्या अस्य भवन्ति” इत्यादिवदश्रुतो ऽपि चासौ विधिनाकृष्यत एव। तस्माद्विधिरेवात्र प्रमाणम्, न श्रवणाश्रवणे—इति काम्यवन्नित्ये ऽपि फलमभ्युपगन्तव्यम्, न वा क्वचिदपीति।**; cf. also *Nyāyamañjarī* II 118.13–14: **ननु विधेः फलापेक्षा नास्ति चेत्, किं तर्ह्यश्रूयमाणफलेषु विश्वजिदादिषु स्वर्गादि फलं कल्प्यते।**; *Āgamaḍambara* 220.10–11: **विश्वजित्युचितमश्रुतं फलं कल्प्यते किमपि विध्यपेक्षया।**
**6 सर्वो हि ⋯ न स्वरूपनिष्ठ इति** ] Cf. *Ślokavārttika codanā* vv. 260cd–261a: **विधीनां चापि सर्वेषां साक्षाद्व्यवहितो ऽपि वा॥ पुरुषार्थः फलं**; *Ślokavārttikatātparyaṭīkā* 114.20: **अपि च पुरुषार्थपर्यवसायित्वाद्विधेः**

---

**1 °भावाः** ] $\mathrm{MVG_1G_2K_1L_1}$; **°भावः** $\mathrm{A_1}$ **4 °शास्त्रमपि** ] $\mathrm{MVA_1G_1G_2K_1L_1}$; **°शास्त्रं** $\mathrm{M^{ka}}$ **4 °शिखाकर्म°** ] $\mathrm{MVA_1G_1G_2^{pc}K_1L_1}$; **°शिखा°** $\mathrm{G_2^{ac}}$ **6 फलवत्ता** ] $\mathrm{MVG_1G_2K_1L_1}$; **फलवत्त** $\mathrm{A_1}$ **6 सर्वो** ] $\mathrm{MVG_1G_2K_1L_1}$; **सर्वा** $\mathrm{A_1}$ **6 पुरुषार्थ°** ] $\mathrm{MVA_1G_1G_2L_1}$; **फल°** $\mathrm{K_1}$ **7 °पनिष्ठ इति** ] $\mathrm{MVA_1G_1G_2L_1}$; **°पनिर्त्थ** $\mathrm{K_1^{ac}}$; **°पनार्त्थ** $\mathrm{K_1^{pc}}$

### [3.1.3 इतिहासपुराणे]

इतिहासपुराणाभ्यामप्युपाख्यानादिवर्णनेन वैदिक एवार्थः प्रायेण प्रतन्यते। यथोक्तम्—

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।
बिभेत्यल्पश्रुताद्वेदो मामयं प्रतरिष्यति॥ इति।

### [3.1.4 उपसंहारः]

तदेवं वेदपुराणधर्मशास्त्राणां स्वत एव पुरुषार्थसाधनोपदेशस्वभावत्वाद्विद्यास्थानत्वम्।

---

**2 इतिहासपुराणाभ्यामपि ··· प्रतन्यते** ] Cf. *Nyāyamañjarī* I 634.9–10, Kataoka [2004b:204.6–7]: एतेनेतिहासपुराणप्रामाण्यमपि निर्णीतं वेदितव्यम्। इतिहासपुराणं हि पञ्चमं वेदमाहुः।; *Tantravārttika* ad 1.3.2 (166.28–167.4), Harikai [2002:82]: एषैवेतिहासपुराणयोरप्युपदेशवाक्यानां गतिः। उपाख्यानानि त्वर्थवादेषु व्याख्यातानि। यत्तु पृथिवीविभागकथनं तद्धर्माधर्मसाधनफलोपभोगप्रदेशविवेकाय किंचिद्दर्शनपूर्वकं किंचिद्वेदमूलम्। वंशानुक्रमणमपि ब्राह्मणक्षत्रियजातिगोत्रज्ञानार्थं दर्शनस्मरणमूलम्। देशकालपरिमाणमपि लोकज्योतिःशास्त्रव्यवहारसिद्ध्यर्थं दर्शनगणितसंप्रदायानुमानपूर्वकम्। भाविकथनमपि त्वनादिकालप्रवृत्तयुगस्वभावधर्माधर्मानुष्ठानफलविपाकवैचित्र्यज्ञानद्वारेण वेदमूलम्।
**4 इतिहास॰ ··· प्रतरिष्यति** ] *Mahābhārata* 1.1.204 (see also Mehendale [2002]); quoted again in *Nyāyamañjarī* I 634.11–12, Kataoka [2004b:204.8–9].
**7 तदेवं ··· ॰स्थानत्वम्** ] Cf. *Nyāyamañjarī* I 634.18–20, Kataoka [2004b:203.6–7]: सर्वथा तावद्वेदाश्चत्वारः पुराणं स्मृतिरिति षडिमानि विद्यास्थानानि साक्षात्पुरुषार्थसाधनोपदेशीनि पूर्वोक्तनीत्या प्रमाणम्; *Nyāyamañjarī* I 635.4–5, Kataoka [2004b:202.4–201.1]: तदिमानि चतुर्दश विद्यास्थानानि प्रमाणम्, कानिचित् साक्षादुपदेशीनि कानिचित् तदुपयोगीनि—इति सिद्धम्।

---

**2 इतिहास॰ ··· यथोक्तम्** ] $MVA_1G_1K_1L_1$; om. $G_2$(eyeskip) **2 ॰पाख्यानादि॰** ] $MVA_1G_1K_1L_1$; ॰पाध्याय॰ $M^{ka}$ **2 प्रायेण** ] $VG_1K_1L_1$; प्रायः $MA_1$
**5 मामयं** ] $MG_1K_1$; ममायं $VA_1G_2L_1$

## [3.2 परंपरया पुरुषार्थसाधनोपयोगीनि]

### [3.2.1 षडङ्गानि]

**अङ्गानि व्याकरणकल्पज्योतिःशिक्षाछन्दोनिरुक्तानि वेदार्थोपयोगिपदादिव्युत्पादनद्वारेण विद्यास्थानत्वं प्रतिपद्यन्ते। तेषामङ्गसमाख्यैव तदनुगामितां प्रकटयति।**

---

**3 अङ्गानि ··· प्रतिपद्यन्ते** ] Cf. *Nyāyamañjarī* I 634.20–635.1, Kataoka [2004b:202.1–2]: **व्याकरणादीनि तु षडङ्गान्यङ्गत्वेनैव तदुपयोगीनि, न साक्षाद्धर्मोपदेशीनि।**; *Tantravārttika* ad 1.3.2 (167.4–16), Harikai [2002:83–84]: **अङ्गविद्यानामपि क्रत्वर्थपुरुषार्थप्रतिपादनं लोकवेदपूर्वकत्वेन विवेक्तव्यम्। (१) तत्र शिक्षायां तावद्यद्वर्णकरणस्वरकालादिप्रविभागकथनं तत्प्रत्यक्षपूर्वकम्। यत्तु तथाविज्ञानात्प्रयोगे फलविशेषस्मरणम्, मन्त्रो हीनः स्वरतो वर्णतो वेति च प्रत्यवायस्मृतिः, तद्वेदमूलम्। (२) एवं कल्पसूत्रेष्वर्थवादादिमिश्रशाखान्तरविप्रकीर्णन्यायलभ्यविध्युपसंहारफलमर्थनिरूपणं तत्तत्प्रमाणमङ्गीकृत्य कृतम्। लोकव्यवहारपूर्वकाश्च केचिद्दृत्विगादिव्यवहाराः सुखार्थहेतुत्वेनाश्रिताः। (३) व्याकरणे ऽपि शब्दापशब्दविभागज्ञानं शाखावृक्षादिविभागवत्प्रत्यक्षनिमित्तम्। साधुशब्दप्रयोगात्फलसिद्धिरपशब्देन तु फलवैगुण्यं भवतीति वैदिकम्। (४) छन्दोविचित्यामपि गायत्र्यादिविवेको लोकवेदयोः पूर्ववदेव प्रत्यक्षः। तज्ज्ञानपूर्वकप्रयोगात्तु फलमिति श्रौतम्। तथा चानिष्टं श्रूयते— यो ह वाविदितार्षेयच्छन्दो दैवतब्राह्मणेन मन्त्रेण यजति याजयति वेत्यादि। (५) ज्योतिःशास्त्रे ऽपि युगपरिवर्तपरिमाणद्वारेण चन्द्रादित्यादिगतिविभागेन तिथिनक्षत्रज्ञानमविच्छिन्नसंप्रदायगणितानुमानमूलं ग्रहसौस्थ्यदौस्थ्यनिमित्तपूर्वकृतशुभाशुभकर्मफलविपाकसूचनं तद्गतशान्त्यादिविधानद्वारेण वेदमूलम्। एतेन सामुद्रवास्तुविद्यादि व्याख्यातम्। ईदृशा वा विधयः सर्वत्रानुमातव्याः।**

---

**3 °कल्पज्योतिःशिक्षाछन्दोनिरुक्तानि** ] $MA_1G_2K_1L_1$; **°ज्योतिःशिक्षाछन्दोनिरुक्तानि** V; **°ज्योतिःशिक्षाछन्दःकल्पनिरुक्तानि** $G_1$ **4 °स्थानत्वं** ] $MVA_1G_1G_2K_1L_1$; **°स्थानं** $M^{ka}$ **4 °समाख्यैव** ] $MVA_1G_2L_1$; **°समाख्ययैव** $G_1$; **°सामाख्यैव** $K_1$

### [3.2.2 मीमांसा]

विचारमन्तरेणाव्यवस्थितवेदवाक्यार्थानवधारणान् मीमांसा वेदवाक्यार्थविचारात्मिका वेदाख्यस्य करणस्येतिकर्तव्यतारूपमनुभवन्ती विद्यास्थानतां प्रतिपद्यते। तथा च भट्टः —

धर्मे प्रमीयमाणे तु वेदेन करणात्मना।
इतिकर्तव्यताभागं मीमांसा पूरयिष्यति॥ इति।

अत एव सप्तममङ्गमिति न गण्यते मीमांसा, प्रत्यासन्नत्वेन वेदैकदेशभूतत्वात्। विचारसहायो हि शब्दः स्वार्थे निराकाङ्क्षं प्रबोधयितुं क्षमः।

---

**2 विचारमन्तरेणा° ··· °नवधारणा°** ] *Tantravārttika* ad 1.3.33 (310.18): मीमांसा चापि वेदार्थतत्त्वनिर्णयकारणम्।
**3 वेदवाक्यार्थविचारात्मिका** ] Cf. *Nyāyamañjarī* I 635.2, Kataoka [2004b:202.3]: मीमांसा वेदवाक्यार्थविचारात्मिका; Cf. *Śābarabhāṣya* ad 1.1.1, Frauwallner [1968:10.16]: वेदवाक्यानामनेकविधो विचार इह वर्तिष्यते; *Tantravārttika* ad 2.1.1 (372.9), Kataoka [2004a:62.4]: वेदार्थविचारात्मकत्वात्
**5 धर्मे ··· पूरयिष्यति** ] quoted from Kumārila's lost work *Bṛhaṭṭīkā*. Cf. also *Prakaraṇapañcikā* 404.15-16, *Nyāyavārttikatātparyaṭīkā* 52.7–8, *Tārkikarakṣā* 195.4–5 (ad v. 74), *Svaditaṅkaraṇī* 24.12-13, *Jaiminīyasūtrārthasaṅgraha* 3.6–7, all of which have हि instead of तु.

---

**2 °रेणाव्य°** ] $MVA_1G_1G_2L_1$; °रेण च व्य° $K_1$ **3 वेदाख्यस्य करणस्ये°** ] $M^{en}A_1G_1G_2K_1L_1$; वेदाकरस्ये° MV **3 °नुभवन्ती** ] $MA_1G_2L_1$; °नुबिभ्रतीति $VG_1$; °नुभवन्तीति $K_1$ **4 प्रतिपद्यते** ] $MVA_1G_1G_2L_1$; लभते $K_1$ **4 तथा च** ] $MVG_1$; तयथा च $A_1$; यथा च $G_2L_1$; यथाह $K_1$ **4 भट्टः** ] $MVG_1G_2K_1L_1$; भटः $A_1$ **5 प्रमीयमाणे** ] $MVG_1G_2K_1$; प्रमीयमाने $A_1$; प्रमेयमाणे $L_1$ **5 तु** ] $MVA_1G_1G_2L_1$; हि $K_1$ **6 मीमांसा** ] $MVG_1G_2K_1L_1$; मीमांस $A_1$(unmetrical) **6 °यिष्यति॥ इति** ] $MK_1$; °यिष्यति $VA_1G_1G_2L_1$ **7 सप्तम°** ] $MVG_1G_2K_1L_1$; समम° $A_1$ **7 °सन्नत्वेन** ] $MVA_1B_1G_1^{pc}G_2K_1L_1$; °सन्नत्वे $G_1^{ac}$ **8 निराकाङ्क्षं प्र°** ] $MVA_1B_1G_1G_2L_1$; प्र° $M^{ka}$; निराकाङ्क्षमव° $K_1$

### [3.2.3 न्यायविस्तरः]

न्यायविस्तरस्तु मूलस्तम्भभूतः सर्वविद्यानाम्, वेदप्रामाण्यरक्षाहेतुत्वात्। वेदेषु हि तार्किकरचितकुतर्कविप्लावितप्रामाण्येषु शिथिलितास्थाः कथमिव बहुवित्तव्ययायासादिसाध्यं वेदार्थानुष्ठानमाद्रियेरन्साधवः। किं वा तदानीं स्वामिनि परिम्लाने तदनुयायिना मीमांसादिविद्यास्थानपरिजनेन कृत्यमिति। तस्मादशेषदुष्टतार्किकोपमर्दद्वारकदृढतरवेदप्रामाण्यप्रत्ययाधायिन्यायोपदेशक्षममक्षपादोपदिष्टमिदं न्यायविस्तराख्यं शास्त्रं शा-

---

**2 न्यायविस्तरस्तु ··· °रक्षाहेतुत्वात्** ] Cf. *Nyāyamañjarī* I 635.3, Kataoka [2004b:202.3–4]: **वेदप्रामाण्यनिश्चयहेतुश्च न्यायविस्तर इत्यामुख एवोक्तम्।**; *Nyāyamañjarī* I 639.20, Kataoka [2004b:194.7–8]: **वेदप्रामाण्यसिद्ध्यर्थं हीदं शास्त्रमारब्धमिति गीयते।**

**3 वेदेषु ··· शिथिलितास्थाः** ] *Nyāyamañjarī* I 640.1–2, Kataoka [2004b:194.10–11]: **महाजनप्रसिद्धिं हि केचिद्विप्लावयन्त्यपि। अतस्तदुपघाताय शास्त्रमस्त्रं प्रयुज्यते॥**; Jayanta summarizes anti-Vedic arguments in *Nyāyamañjarī* I 412.14–I 414.17, which end: **तेन वेदप्रमाणत्वं विषमे पथि वर्तते। जीविकोपायबुद्ध्या वा श्रद्धया वाभ्युपेयताम्॥**; cf. also *Āgamaḍambara* 52.11–12: **अग्न्याश्चैते वेदविप्लवकृतां कुबुद्धयः शौद्धोदनिशिष्यकाः।**

---

**2 °विस्तर°** ] $MVA_1B_1G_1G_2K_1L_1^{pc}$ ; **°स्तर°** $L_1^{ac}$ **2 सर्वविद्यानाम्** ] $MVA_1B_1G_1G_2L_1$ ; **सर्वविद्यास्थानां** $K_1$ **2 वेदप्रा°** ] $MVB_1G_1G_2K_1L_1$ ; **विदप्रा°** $A_1$ **3 °रक्षाहेतुत्वात्** ] $MA_1B_1G_2K_1L_1$ ; **°हेतुत्वात्** $VG_1$ **3 तार्किक°** ] $VG_1G_2L_1$ ; **दुस्तार्किक°** M; **ताकिंक°** $A_1$ ; **तार्किका°** $B_1$ ; **तार्किकवि°** $K_1$ **4 शिथिलि°** ] $MVA_1B_1G_1G_2K_1L_1$ ; **शिक्षि°** $M^{ka}$ **4 °व्ययायासादि°** ] $MVA_1B_1G_1^{pc}K_1L_1$ ; **°व्ययायासा°** $G_1^{ac}$ ; **°व्यायायासादि°** $G_2$ **5 °येरन्सा°** ] $MA_1B_1G_1G_2K_1L_1$ ; **°येरन्त्सा°** V **5 किं वा** ] $MVA_1B_1G_1G_2L_1$ ; **किञ्च** $K_1$ **5 तदानीं** ] $VA_1B_1G_1G_2K_1L_1$ ; om. M **5 स्वामिनि** ] $MVB_1G_1G_2K_1L_1$ ; **स्वामिना** $A_1$ **6 तदनु°** ] $MVB_1G_1G_2K_1L_1$ ; **ननु°** $A_1$ **7 कृत्यमिति** ] $MVA_1B_1G_1G_2L_1$ ; **कृत्यं** $K_1$ **7 °तार्किको°** ] $MVB_1G_1G_2K_1L_1$ ; **°ताकिंको°** $A_1$ **7 °पमर्द°** ] $MVA_1B_1G_1^{pc}G_2K_1L_1$ ; **°पर्द°** $G_1^{ac}$ **8 °शक्षमम°** ] $MVA_1B_1G_1G_2L_1$ ; **°शदक्षम°** $K_1$ **8 °दिष्टमिदं** ] $MVA_1B_1G_1G_2L_1$ ; **°दिष्टन्** $K_1$ **8 °राख्यं** ] $MVA_1B_1G_1G_2L_1$ ; **°राख्यमिदं** $K_1$

स्त्रप्रतिष्ठाननिबन्धनमिति धुर्यं विद्यास्थानम्।

## [4 चतुर्दशानां शास्त्राणां विद्यास्थानत्वम्]

### [4.1 तत्र युक्त्यागमौ]

विद्यास्थानत्वं च नाम चतुर्दशानां शास्त्राणां पुरुषार्थसाधनज्ञानोपायत्वमेवोच्यते। यतो वेदनं विद्या। तच्च न घटादिवेदनम्, अपि तु पुरुषार्थसाधनवेदनम्। विद्यायाः स्थानमाश्रयः, उपाय इत्यर्थः। तच्च पुरुषार्थसाधनपरिज्ञानोपायत्वं कस्यचित्साक्षात्कारेण कस्यचिदुपायद्वारेणेति तानीमानि चतुर्दश विद्यास्थानान्याचक्षते। यथोक्तम्—

पुराणतर्कमीमांसाधर्मशास्त्राङ्गमिश्रिताः।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश॥ इति।

अन्यत्राप्युक्तम्—

---

**10 पुराणतर्क॰ ··· चतुर्दश** ] *Yājñavalkyasmṛti* 1.3 (॰तर्क॰ ] ॰न्याय॰); quoted again in *Nyāyamañjarī* I 618.19–20.

---

**1 शास्त्रं शास्त्र॰** ] $MA_1B_1G_1G_2K_1L_1$ ; **शास्त्रं** V **1 ॰निबन्धनमिति** ] $MVB_1G_1G_2K_1L_1$ ; **॰निवधनेनिति** $A_1$ **1 धुर्यं** ] $MB_1G_1G_2K_1L_1$ ; **पदं** V; **धुर्य** $A_1$ **1 विद्यास्थानम् ··· चतुर्दशानां** ] $MVB_1G_1G_2L_1$ ; **विद्या×तच्च न घटादिवेदनमपि तु पुरुषार्थसाधनवेदनं×स्थानं विद्यास्थानत्वं च नाम चतुर्दशानां** $A_1$(eyeskip) ; +++++++++++++++++ $K_1$ **4 च नाम** ] $A_1^{pc}B_1G_1G_2L_1$ ; **नाम** MV **5 ॰नोपाय॰** ] $MVA_1^{pc}B_1G_1G_2L_1$ ; **॰नोपयोग॰** $K_1$ **5 यतो वेदनं** ] $M^{ka}B_1G_2K_1L_1$ ; **वेदनं** $MVA_1^{pc}G_1G_2$ **6 पुरुषार्थसाधन॰ ··· तच्च** ] $MVA_1B_1^{pc}G_1G_2K_1L_1$ ; om. $B_1^{ac}$(eyeskip) **7 ॰साधनपरिज्ञानो॰** ] $MVA_1B_1G_1G_2L_1$ ; **॰साधनो॰** $K_1$ **7 ॰त्साक्षात्कारेण** ] $VB_1G_1G_2L_1$ ; **॰त्साक्षात्** M; **॰त्साक्षादेव** $A_1$ ; ++**देव** $K_1$ **8 ॰दुपायद्वारेणेति** ] $VB_1L_1$ ; **॰दुपायद्वारेण** $MG_2$ ; **॰त्तदुपकारद्वारेणेति दर्शितं** $A_1$ ; **॰दुपायनद्वारेणेति** $G_1$ ; **॰दुपकारद्वारेणेति दर्शितं** $K_1$ **8 ॰नीमानि** ] $MVB_1G_1G_2K_1L_1$ ; **॰नीमा** $A_1$ **8 ॰स्थानान्या॰** ] $A_1K_1L_1$ ; **॰स्थानानीत्या॰** $MVB_1G_1G_2$ **11 विद्यानां** ] $MVB_1G_1G_2K_1L_1$ ; **विद्याना** $A_1$ **12 अन्यत्रा॰** ] $MVB_1G_1G_2K_1L_1$ ; **अन्यत्र॰** $A_1$

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।
पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश॥ इति।

[4.2 षट्तर्क्यां कतमत्तर्कन्यायविस्तरशब्दाभिधेयम्]

पूर्वत्र तर्कशब्देनोपात्तमुत्तरत्र च न्यायविस्तरशब्देनैतदेव शास्त्रमुच्यते। न्यायस्तर्को ऽनुमानम्, सो ऽस्मिन्नेव व्युत्पाद्यते।

[4.2.1 साङ्ख्यार्हताः]

यतः साङ्ख्यार्हतानां तावत्क्षपणकानां कीदृशमनुमानोपदेशकौशलम्। कियदिव तत्तर्केण वेदप्रामाण्यं रक्ष्यत इति नासाविह गणनार्हः।

[4.2.2 बौद्धाः]

बौद्धास्तु यद्यप्यनुमानमार्गावगाहननैपुणाभिमानोद्धुरां कन्धरामुद्वह-

---

**1 अङ्गानि ··· ह्येताश्चतुर्दश** ] *Viṣṇupurāṇa* 3.6.27; quoted again in *Nyāyamañjarī* I 619.1–2, II 258.8–9; also quoted in *Nyāyabhūṣaṇa* 71.19–20

---

**1 °विस्तरः** ] $MVA_1B_1G_1G_2^{pc}K_1L_1$; **°विरः** $G_2^{ac}$(unmetrical) **2 °शास्त्रं च** ] $MVA_1B_1G_1G_2L_1$; **°शास्त्राणि** $K_1$ **4 पूर्वत्र** ] $MVB_1G_1G_2L_1$; **पूर्वत्र श्लोके** $M^{en}A_1K_1$ **4 °नोपात्तमुत्तरत्र च** ] $MVA_1B_1G_1G_2L_1$; **°नोत्तमुत्तरत्र** $K_1$ **4 °विस्तर°** ] $MVA_1B_1G_1G_2K_1L_1^{pc}$; **°विस्तरे°** $L_1^{ac}$ **4 °शब्देनैतदेव** ] $MVB_1G_1L_1$; **°शब्देनेतदेव** $A_1$; **°शब्देन तदेव** $G_2$; **°शब्देनेतमेव** $K_1$; **°शब्देन** $L_1^{ac}$; **°शब्देन एतत्** $L_1^{pc}$ **5 °स्तर्को** ] $MVB_1G_1G_2K_1L_1$; **°स्तर्कौः** $A_1$ **5 सो** ] $MVB_1G_1G_2K_1L_1$; **त्सौ** $A_1$ **5 °न्नेव** ] $VB_1G_1G_2K_1L_1$; **°न्नेव शास्त्रे** $MA_1$ **5 व्युत्पाद्यते** ] $MA_1B_1G_1G_2L_1$; **व्युत्पद्यते** $K_1$ **7 °र्हतानां तावत्क्ष°** ] $MVB_1G_1G_2L_1$; **°र्हताना तावत्क्ष°** $A_1$; **°र्हतानां क्ष°** $K_1$ **7 कीदृश°** ] $MVB_1G_1G_2K_1L_1$; **कादृश°** $A_1$ **7 °मानोपदेश°** ] $MVA_1B_1G_1G_2K_1^{pc}L_1$; **°मानोप°** $K_1^{ac}$ **7 °कौशलम्** ] $MVB_1G_1G_2K_1L_1$; **°कौशल** $A_1$ **8 कियदिव** ] $M^{ka}A_1B_1G_1G_2K_1L_1$; **कियदेव** MV **8 °प्रामाण्यं** ] $MVB_1G_1G_2K_1L_1$; **°प्रामाण्य** $A_1$ **8 नासाविह** ] $MVA_1B_1G_1G_2K_1L_1$; **नेहासौ** $M^{ka}$ **8 गणनार्हः** ] $MVB_1G_1G_2K_1L_1$; **गणितः** $M^{en}A_1$ **10 बौद्धास्तु** ] $MVB_1G_1G_2K_1L_1$; **बौद्धास्त** $A_1$ **10 °नुमानमार्गा°** ] $MVA_1B_1G_1G_2L_1^{pc}$; **°नुमाना°** $M^{ka}K_1$; **°नुमार्गा°** $L_1^{ac}$

न्ति, तथापि वेदविरुद्धत्वात्तत्तर्कस्य कथं वेदादिविद्यास्थानस्य मध्ये पाठः। अनुमानकौशलमपि कीदृशं शाक्यानामिति पदे पदे दर्शयिष्यामः।

### [4.2.3 चार्वाकाः]

चार्वाकास्तु वराकाः प्रतिक्षेप्तव्या एव। कः क्षुद्रतर्कस्य तदीयस्येह गणनावसरः।

### [4.2.4 वैशेषिकनैयायिकाः]

वैशेषिकाः पुनरस्मदनुयायिन एवेत्येवमस्यां जनतासु प्रसिद्धायामपि षट्तर्क्यामिदमेव तर्कन्यायविस्तरशब्दाभ्यां शास्त्रमुक्तम्।

---

**1 वेदविरुद्धत्वात्तत्तर्कस्य** ] Cf. *Nyāyamañjarī* I 637.6, Kataoka [2004b:199.13]: **बुद्धशास्त्रे हि विस्पष्टा दृश्यते वेदबाह्यता।**; *Nyāyamañjarī* 637.22–638.1, Kataoka [2004b:197.4–5]: **न वेदविरुद्धानां बौद्धाद्यागमानाम्—इति कुतस्तेषामाप्तप्रणीतत्वम्।**

**5 चार्वाकास्तु वराकाः प्रतिक्षेप्तव्या एव** ] See Kataoka [2004b:181–180], section 6.3.4, for Jayanta's final view on the Lokāyatas, in particular *Nyāyamañjarī* I 648.5–6, Kataoka [2004b:180.8–9]: **तदेवं पूर्वपक्षवचनमूलत्वाल्लोकायतशास्त्रमपि न स्वतन्त्रम्, उत्तरवाक्यप्रतिहतत्वात्तु तदनादरणीयम्॥**

---

**1 °नैपुणाभिमानोद्धुरां कन्धरामुद्वहन्ति** ] $M^{en}VB_1G_1G_2L_1^{pc}$; **°नैपुणोद्धुरां कन्धरामुद्वहन्ति** M; **°नैपुणोद्धुरां उद्वहन्ति** $M^{ka}$; **°नैपुणाभिमानोद्धारां कंधरामुद्वहेति** $A_1^{ac}$; **°नैपुणाभिमानोद्धुरां कंधरामुद्वहेति** $A_1^{pc}$; **°नैपुणाभिमानोद्धुरामुद्वहन्ति कन्धरान्** $K_1$; **°नैपुणाभिमानोद्धुरामुद्वहन्ति** $L_1^{ac}$ **1 °नस्य मध्ये** ] $VB_1G_1G_2L_1$; **°नमध्ये** $MA_1K_1$ **2 अनुमान°** ] $MVB_1G_1G_2K_1L_1$; **ननुमान°** $A_1$ **2 कीदृशं शाक्यानामिति** ] $MVA_1B_1G_1G_2L_1$; **शाक्यानां कीदृशमिति** $K_1$ **5 प्रतिक्षेप्त°** ] $MVB_1G_1G_2K_1L_1$; **प्रतिक्षेम°** $A_1$ **5 °व्या एव। कः** ] $MVB_1G_1G_2L_1$; **°व्या एव क इव** $M^{en}A_1$; **°व्याः वे** $K_1$ **5 °तर्कस्य** ] $MVB_1G_1G_2K_1L_1$; **°तलकस्य** $A_1$ **5 तदीय°** ] $MVA_1B_1G_1G_2K_1L_1^{pc}$; **तदेय°** $L_1^{ac}$ **8 एवेत्येवमस्यां** ] $MVA_1B_1G_1G_2L_1$; **एवेत्यस्यां** $K_1$ **9 °मिदमेव** ] $MVA_1B_1G_1G_2L_1$; **°मिदमेव हि** $K_1$ **9 तर्कन्यायविस्तर°** ] $MVA_1B_1G_1G_2L_1$; **°तर्कन्याय°** $K_1$

### [4.3 आन्वीक्षिकीशब्दव्युत्पत्तिः]

इयमेवान्वीक्षिकी चतसृणां विद्यानां मध्ये न्यायविद्या गण्यते—

आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च शाश्वती। इति।

प्रत्यक्षागमाभ्यामीक्षितस्यान्वीक्षणमन्वीक्षा, अनुमानमित्यर्थः। तद्व्युत्पादकं शास्त्रमान्वीक्षिकीति।

### [4.4 सङ्ख्याभेदसमन्वयः]

ननु चतस्रश्चेद्विद्याः, तत्कथं चतुर्दश दर्शिताः। नैष विरोधः। वार्तादण्डनीत्योर्दृष्टैकप्रयोजनत्वेन सर्वपुरुषार्थोपदेशिविद्यावर्गे गणनानर्हत्वात् त्रय्यान्वीक्षिक्योश्च तत्र निर्देशात्ताश्चतुर्दशैव विद्याः।

---

**3 आन्वीक्षिकी ··· शाश्वती** ] Cf. *Kauṭilīyārthaśāstra* 1.2.1: आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिश्चेति विद्याः।; *Mahābhārata* 12.59.33ab: त्रयी चान्वीक्षिकी चैव वार्ता च भरतर्षभ।; *Viṣṇupurāṇa* 1.9.121ab: आन्वीक्षिकी त्रयी वार्ता दण्डनीतिस्त्वमेव च।; *Bhāgavatapurāṇa* 3.12.44ab: आन्वीक्षिकी त्रयी वार्ता दण्डनीतिस्तथैव च।

**4 प्रत्यक्षागमाभ्यामी॰ ··· ॰न्वीक्षिकीति** ] *Nyāyabhāṣya* ad 1.1.1 (3.11–13): कः पुनरयं न्यायः। प्रमाणैरर्थपरीक्षणम्। प्रत्यक्षागमाश्रितं चानुमानम्। सान्वीक्षा। प्रत्यक्षागमाभ्यामीक्षितस्यार्थस्यान्वीक्षणमन्वीक्षा। तया प्रवर्तत इत्यान्वीक्षिकी न्यायविद्या न्यायशास्त्रम्।

---

**2 इयमेवान्वी॰** ] $MVA_1B_1G_1G_2L_1$ ; **इयमेव चान्वी॰** $K_1$ **2 चतसृणां** ] $MVA_1B_1G_1G_2L_1$ ; **चतसृणामपि** $K_1$ **2 विद्यानां मध्ये** ] $MVA_1B_1G_1G_2L_1$ ; **विद्यानान्** $K_1$ **3 दण्ड॰** ] $MVA_1B_1G_1G_2L_1$ ; **दण्डि॰** $K_1$ **3 ॰तिश्च शाश्वती। इति** ] $MVA_1B_1G_1$ ; **॰तिश्च शाश्वती** $G_2L_1$ ; **॰तिश्चतुर्द्दशाश्वतीति** $K_1$(unmetrical) **4 ॰भ्यामी॰** ] $MVA_1^{pc}B_1G_1G_2K_1L_1$ ; **॰भ्यामीति॰** $A_1^{ac}$ **4 ॰न्वीक्षणमन्वीक्षा, अनु॰** ] $MVA_1B_1G_1K_1L_1$ ; **॰न्वीक्षिकी नु॰** $G_2^{ac}$; **॰न्वीक्षणमन्वीक्षिकी नु॰** $G_2^{pc}$ **5 ॰मान्वीक्षिकीति** ] $G_2K_1L_1$ ; **॰मान्वीक्षिकी** $MA_1B_1G_1$ ; **॰मान्वीक्षिकम्** V **7 चतस्र॰** ] $MVA_1B_1G_1G_2K_1L_1^{pc}$ ; **चतस्रा॰** $L_1^{ac}$ **7 तत्कथं** ] $MA_1B_1G_2L_1$ ; **कथं** $VG_1K_1$ **8 ॰दण्ड॰** ] $MVA_1B_1G_1G_2L_1$ ; **॰दण्डि॰** $K_1$ **8 ॰पदेशि॰** ] $MVB_1G_1G_2K_1L_1$ ; **॰पयोगि॰** $M^{en}A_1$ **9 ॰नानर्ह॰** ] $MVA_1B_1G_1G_2K_1$ ; **॰नार्ह॰** $L_1$ **9 निर्देशात्ताश्च॰** ] $A_1B_1G_1G_2K_1L_1$ ; **निर्देशाच्च॰** MV

## [5 वेदप्रामाण्यरक्षाहेतुभूतन्यायशास्त्रारम्भसफलता]

### [5.1 न्यायमीमांसयोः प्रस्थानभेदः]

ननु वेदप्रामाण्यनिर्णयप्रयोजनश्चेन्न्यायविस्तरः, कृतमनेन, मीमांसात एव तत्सिद्धेः। तत्र ह्यर्थविचारवत्प्रामाण्यविचारो ऽपि कृत एव।

सत्यम्। स त्वानुषङ्गिकस्तत्र, मुख्यस्त्वर्थविचार एव। पृथक्प्रस्थाना हीमा विद्याः। सा च वाक्यार्थविद्या, न प्रमाणविद्येति।

न च मीमांसकाः सम्यग्वेदप्रामाण्यरक्षणक्षमां सरणिमवलोकयितुं क्षमाः। कुतर्ककण्टकनिकरनिरुद्धसंचारमार्गाभासपरिभ्रान्ताः

---

**4 तत्र ··· कृत एव** ] Jayanta has in mind in particular Kumārila's theory of *svataḥprāmāṇya* discussed in *Ślokavārttika codanā* vv. 32–102ab.

**6 स त्वानुषङ्गिकस्तत्र** ] Cf. *Nyāyamañjarī* I 420.2–6: **ननु शब्दप्रामाण्यचिन्तावसरे सकलप्रमाणप्रामाण्यविचारस्य कः प्रसङ्गः। न स्वातन्त्र्येण प्रीक्षणम्, अपि तु तदर्थमेव, समानमार्गत्वात्। यथान्येषां स्वतः परतो वा प्रामाण्यम्, तथा शब्दस्यापि भविष्यतीति। न हि तस्य स्वरूपमिव प्रामाण्यमपि तद्विसदृशमिति।**

**7 पृथक्प्रस्थाना हीमा विद्याः** ] Cf. *Nyāyabhāṣya* ad 1.1.1 (2.18–20): **इमास्तु चतस्रो विद्याः पृथक्प्रस्थानाः प्राणभृतामनुग्रहायोपदिश्यन्ते, यासां चतुर्थीयमान्वीक्षिकी न्यायविद्या।**

**9 °मार्गाभासपरिभ्रान्ताः** ] This sounds all the more ironical when one considers Kumārila's statement in *Tantravārttika* ad 1.3.2 (167.30–31), Harikai [2002:86]: **प्रायेण च मनुष्याणामधर्मभूयिष्ठत्वात्तज्ज्ञानप्रतिबद्धाः प्रतिभास्तेषु तेषु कुमार्गेषु प्रवर्तन्ते।**

---

**3 °विस्तरः** ] $MVB_1G_1G_2K_1L_1$ ; **°विस्तरः कृतः** $A_1$ **4 °त एव** ] $MVA_1B_1G_1G_2K_1^{pc}L_1$ ; **°त ए** $K_1^{ac}$ **6 °नुषङ्गि°** ] $MVB_1G_1G_2K_1L_1$ ; **°नुषांगि°** $A_1$ **6 मुख्यस्त्व°** ] $MVA_1G_1G_2K_1L_1$ ; **मुख्यः स्त्व°** $B_1$ **7 हीमा** ] $MVB_1G_1G_2K_1L_1$ ; **हामा** $A_1$ **7 प्रमाण°** ] $MVA_1B_1^{pc}G_1G_2K_1L_1$ ; **पुराण°** $M^{ka}$ ; **प्रमाणं** $B_1^{ac}$ **8 सरणि°** ] $MVB_1G_1G_2K_1L_1$ ; **सराणि°** $A_1$ **9 क्षमाः** ] $M^{en}A_1G_2L_1$ ; **कुशलाः** $MVB_1G_1K_1$ **9 °संचार°** ] $MA_1B_1G_1G_2K_1L_1$ ; **°सञ्चर°** V **9 °भ्रान्ताः** ] $MVA_1B_1G_1G_2L_1$ ; **°भ्रान्त्वाः** $K_1$

खलु त इति वक्ष्यामः। न हि प्रमाणान्तरसंवाददार्ढ्यमन्तरेण प्रत्यक्षादीन्यपि प्रमाणभावं भजन्ते, किमुत तदधीनवृत्तिरेष शब्दः। शब्दस्य हि समयोपकृतस्य बोधकत्वमात्रं स्वाधीनम्। अर्थतथात्वेतरत्वपरिनिश्चये तु पुरुषमुखप्रेक्षित्वमस्यापरिहार्यम्। तस्मादाप्तोक्तत्वादेव शब्दः प्रमाणीभवति नान्यथेति। एतच्चास्मिन्नेव शास्त्रे व्युत्पादयिष्यते।

---

**1 वक्ष्यामः** ] See in particular *prāmāṇyavāda* discussed in *Nyāyamañjarī* I 419.20–451.21, which ends: तस्माददृष्टपुरुषार्थपदोपदेशि मानं मनीषिभिरवश्यपरीक्षणीयम्। प्रामाण्यमस्य परतो निरणायि चेति चेतःप्रमाथिभिरलं कुविकल्पजालैः॥; cf. also *Nyāyamañjarī* I 451.23–452.2: सुशिक्षितास्त्वाचक्षते—युक्तं यदमी मीमांसकपाशाः काशकुसुमराशय इव शरदि मरुद्भिरतिदूरमुत्सार्यन्ते (°दूरमुत्सार्यन्ते ] $L_1$; °दूरात्समुत्सार्यन्ते M) दुष्टतार्किकैः। ये हि किलाभ्युपयन्ति (°यन्ति ] $L_1$; °यन्ति च M) विपरीतख्यातिवादमकृतास्त्राः, प्रामाण्यं च स्वत इति (इति ] $L_1$; इति च M) वदन्ति, तेषां कुतः कौशलम्।

**1 न हि ··· शब्दः** ] Cf. *Nyāyamañjarī* I 481.11–12: प्रत्यक्षादिप्रमाणानां तद्यथास्तु तथास्तु वा। शब्दस्य हि प्रमाणत्वं परतो मुक्तसंशयम्॥

**3 अर्थतथात्वे° ··· °परिहार्यम्** ] *Nyāyamañjarī* I 482.10–12: तस्याः शब्दजनितायाः प्रमितेर्यथार्थेतरत्वं पुरुषदर्शनाधीनम्—सम्यग्दर्शिनि शुचौ पुरुषे सति सत्यार्था सा भवति प्रतीतिः, इतरथा तु तद्विपरीतेति।

**5 °दाप्तोक्तत्वादेव** ] Cf. *Nyāyasūtra* 1.1.7 आप्तोपदेशः शब्दः and Jayanta's commentary on it (*Nyāyamañjarī* I 396ff).

**6 व्युत्पादयिष्यते** ] *Nyāyamañjarī* I 482.15–16: तस्मात्पुरुषगुणदोषाधीनावेव शाब्दे प्रत्यये संवादविसंवादौ।

---

**2 प्रमाण°** ] $MVA_1B_1G_1G_2K_1L_1^{pc}$; प्रभामाण° $L_1^{ac}$ **3 समयोप°** ] $MVA_1B_1G_2K_1L_1$; समयो° $G_1$ **3 °मात्रं** ] $MVB_1G_1G_2K_1L_1$; °मात्र $A_1$ **3 अर्थ°** ] $MVA_1B_1G_1G_2K_1L_1^{pc}$; अर्था° $L_1^{ac}$ **4 °तरत्वपरिनिश्चये** ] $MVB_1G_1G_2K_1L_1$; °तदत्वनिश्चये $A_1$ **6 °दयिष्यते** ] $MVA_1B_1G_1G_2K_1$; °दयिष्यति $L_1$

[5.2 **विद्यादिकालः**]

नन्वक्षपादात्पूर्वं कुतो वेदप्रामाण्यनिश्चय आसीत्।

अत्यल्पमिदमुच्यते। जैमिनेः पूर्वं केन वेदार्थो व्याख्यातः। पाणिनेः पूर्वं केन पदानि व्युत्पादितानि। पिङ्गलात्पूर्वं केन छन्दांसि विरचितानि। आदिसर्गात्प्रभृति वेदवदिमा विद्याः प्रवृत्ताः। संक्षेपविस्तरविवक्षया तु तांस्तांस्तत्र तत्र कर्तॄनाचक्षते।

[5.3 **अधिकारिपुरुषभेदः**]

ननु वेदप्रामाण्यं निर्विचारसिद्धमेव साधवो मन्यन्त इति किमत्र विचारयत्नेन।

न, संशयविपर्यासनिरासार्थत्वात्। यस्य हि वेदप्रामाण्ये संशयाना विपर्यस्ता वा मतिः, तं प्रति शास्त्रारम्भः। न हि विदितवेदार्थं प्रति मीमांसा प्रस्तूयते। तदुक्तम्—

---

**5 आदिसर्गात्प्रभृति ··· प्रवृत्ताः** ] Cf. *Tantravārttika* ad 1.3.2 (167.17–19), Harikai [2002:84]: मीमांसा तु लोकादेव प्रत्यक्षानुमानादिभिरविच्छिन्नसंप्रदायपण्डितव्यवहारैः प्रवृत्ता। न हि कश्चिदपि प्रथममेतावन्तं युक्तिकलापमुपसंहर्तुं क्षमः।

**6 संक्षेपविस्तरविवक्षया** ] Cf. *Nyāyamañjarī* I 607.2–4: अथोच्येत—अनादिरेवैषा चिकित्सकस्मृतिर्व्याकरणादिस्मृतिवत्। संक्षेपविस्तरविवक्षयैव चरकादयः कर्तारः, न तु ते सर्वदर्शिनः।; *Nyāyamañjarī* II 258.4–5: संक्षेपविस्तरविवक्षया हि पाणिनिपिङ्गलपराशरप्रभृतयस्तत्र तत्र कर्तारः प्रसिद्धिं गताः।

---

**3 अत्यल्पमिद॰** ] $MVA_1B_1G_1G_2K_1L_1$ ; अत्यल्पस्येद॰ $V^{fn}$ **4 पाणिनेः** ] $MVB_1G_1G_2K_1L_1$ ; पाणिनैः $A_1$ **4 ॰त्पूर्वं** ] $MVB_1G_1G_2K_1L_1$ ; ॰त्पूर्व $A_1$ **5 विरचितानि** ] $M^{ka}A_1B_1G_2K_1L_1$ ; रचितानि $MVG_1$ **6 ॰या तु** ] $MVA_1^{pc}B_1G_1G_2K_1$ ; ॰या तु या $A_1^{ac}$ ; ॰या $L_1$ **6 ॰स्तांस्तत्र तत्र** ] $MVB_1G_2L_1$ ; ॰स्तास्तत्र तत्र $A_1$ ; ॰स्तांस्तत्र $G_1$ ; ॰स्तान् $K_1$ **8 निर्विचारसिद्धमेव** ] $MVB_1G_1G_2$ ; निविचारसिद्धमेव $A_1$ ; निर्विचारसिद्धं $K_1$ ; निर्विचारमेव $L_1$ **10 ॰विपर्यास॰** ] $MVA_1B_1G_1G_2L_1$ ; ॰विपर्यय॰ $K_1$

नान्यतो वेदविद्भ्यश्च सूत्रवृत्तिक्रियेष्यते। इति।

भवति च चतुष्प्रकारः पुरुषः—अज्ञः सन्दिग्धो विपर्यस्तो निश्चितमतिश्चेति। तत्र निश्चितमतिरेष मुनिरमुना शास्त्रेणाज्ञस्य ज्ञानमुपजनयति, संशयानस्य संशयमपहन्ति, विपर्यस्तस्य विपर्यासं व्युदस्यतीति तान्प्रति युक्तः शास्त्रारम्भः।

### [5.4 अक्षपादप्रणीतशास्त्रसफलता]

कथं पुनरस्यर्षेरपि निश्चितमतित्वं जातम्।

उच्यते। भवति तावदेष निश्चितमतिः। स तु तपःप्रभावाद्वा देवताराधनाद्वा शास्त्रान्तराभ्यासाद्वा भवतु। किमनेन।

तत्रैतत्स्यात्। तत एव शास्त्रान्तरादस्मदादेरपि तत्त्वाधिगमो भविष्यतीति किमनेनाक्षपादप्रणीतेन शास्त्रेण।

परिहृतमेतत्, संक्षेपविस्तरविवक्षया शास्त्रकरणसाफल्यात्।

---

**1 नान्यतो ··· °क्रियेष्यते** ] *Ślokavārttika pratijñā* v. 43ab
**12 परिहृतमेतत्** ] See section 5.2.

---

**1 वेद°** ] MVA$_1$B$_1$G$_1$G$_2$K$_1$L$_1^{pc}$; **वेदप्र°** L$_1^{ac}$ **1 °वृत्ति°** ] MVA$_1$G$_1$G$_2$K$_1$L$_1$; **°वृत्तिः** B$_1$ **3 मुनि°** ] MVB$_1$G$_1$G$_2$K$_1$L$_1$; **मनि°** A$_1$ **4 °शयानस्य** ] MVB$_1$G$_1$G$_2$K$_1$L$_1$; **°शयानस्यं** A$_1$ **4 °मपहन्ति** ] G$_1$K$_1$L$_1$; **°मुपहन्ति** MVA$_1$B$_1$G$_2$ **4 विपर्यस्तस्य** ] M$^{ka}$A$_1$B$_1$G$_2$L$_1$; **विपर्यस्यतो** MVG$_1$K$_1$ **4 विपर्यासं** ] MVB$_1$G$_1$G$_2$K$_1$L$_1$; **विषयासं** A$_1$ **7 कथं** ] M$^{en}$A$_1$B$_1$G$_2$L$_1$; **कुतः** MVG$_1$K$_1$ **7 °स्यर्षेरपि नि°** ] VG$_1$; **°स्य मुनेर्नि°** MB$_1$G$_2$L$_1$; **°स्य ऋषेरपि नि°** M$^{ka}$; **°स्य मुनेनि°** A$_1$; **°स्य परमर्षेर्नि°** K$_1$ **8 °देष** ] MVA$_1$B$_1$G$_1$G$_2$L$_1$; **°दयन्** K$_1$ **8 °भावाद्वा** ] MVG$_1$K$_1$L$_1$; **°भावा** A$_1$; **°भावात्** B$_1$; **°भावाद्** G$_2$ **9 °राभ्यासा°** ] MVG$_1$G$_2$K$_1$L$_1$; **°रा°** M$^{ka}$B$_1$; **°राभ्यांसा°** A$_1$ **10 तत्रैतत्स्यात्** ] MVA$_1$B$_1$G$_1$G$_2$K$_1$L$_1^{pc}$; **तत्रैत्स्यात्** L$_1^{ac}$ **10 °रादस्मदादेरपि** ] MVA$_1$B$_1$G$_1$G$_2$L$_1$; **°रात्** K$_1$ **10 तत्त्वाधिगमो** ] MVA$_1$B$_1$G$_1$G$_2$K$_1$L$_1$; **तत्त्वावगमो** M$^{ka}$ **11 किमनेनाक्ष°** ] M$^{en}$A$_1$G$_2$L$_1$; **किमक्ष°** MVB$_1$G$_1$K$_1$ **12 °करण°** ] A$_1$G$_2$K$_1$L$_1$; **°प्रणयनस्य** MVB$_1$G$_1$; **°करणस्य** M$^{en}$; **°प्रणयनं यस्य** V$^{fn}$

विचित्रचेतसश्च भवन्ति पुमांस इत्युक्तम्। येषामित एवाज्ञानसंशयविपर्यया विनिवर्तन्ते, तान्प्रत्येतत्प्रणयनं सफलमितीदं प्रणीतवानाचार्यः।

---

**1 इत्युक्तम्** ] See section 5.3.

---

**1 पुमांस** ] $A_1G_2K_1L_1$ ; **पुरुषा** $MVB_1G_1$ **2 एवाज्ञानसंशय॰** ] $MVA_1B_1G_1G_2L_1$ ; **एव संशयाज्ञान॰** $K_1$ **2 ॰विपर्यया** ] $MVB_1K_1L_1$ ; **॰विपर्येया** $A_1$ ; **॰विपर्यासा** $G_1$ ; **॰विपर्या** $G_2$ **2 विनिवर्तन्ते** ] $MVB_1G_1G_2K_1L_1$ ; **विनिवर्तते** $A_1$